## कर्मवेषाद्यत्। (१००/१७६४)

कर्मवेषशब्दाभ्यां तृतीयासमर्थाभ्यां यत् प्रत्ययो भवति सम्पादिनि इत्येतस्मिन् विषये। ठञोऽपवादः। कर्मणा [1]सम्पद्यते कर्मण्यं [2]शरीरम्। वेषेण संपद्यते वेष्यो नटः[3]॥

## तस्मै प्रभवति सन्तापादिभ्यः। (१०१/१७६५)

तस्मै इति चतुर्थीसमर्थेभ्यः सन्तापादिभ्यः [4]प्रभवति इत्यस्मिन् [5]विषये ठञ् प्रत्ययो भवति। समर्थः, शक्त प्रभवति इत्युच्यते। [6]अलमर्थे चतुर्थी। सन्तापाय [7]प्रभवति सान्तापिकः। [8]सान्नाहिकः।

सन्ताप। सन्नाह। सङ्ग्राम। संयोग। संपराय[9]। [10]संपेष। निष्पेष। निसर्ग। [11]असर्ग। विसर्ग। उपसर्ग। उपवास। प्रवास। सङ्घात। [12]संमोदन। सक्तुमांसौदनाद्विगृहीतादपि[13]॥

## योगाद्यच्च। (१०२/१७६६)

योगशब्दात् यत् प्रत्ययो भवति, चकारात् ठञ्, तस्मै प्रभवति इत्यस्मिन् [14]विषये। योगाय [15]प्रभवति योग्यः[16], यौगिकः॥

## कर्मण उकञ्। (१०३/१७६७)

कर्मन्शब्दात् उकञ् प्रत्ययो भवति तस्मै प्रभवति इत्येतस्मिन्नर्थे। [17]ठञोऽपवादः। कर्मणे प्रभवति कार्मुकं धनुः। [18]धनुषोऽन्यत्र न भवति, अनभिधानात्॥

## समयस्तदस्य प्राप्तम्। (१०४/१७६८)

समयशब्दात् तत् इति प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं प्राप्तं चेद् तद् भवति। समयः प्राप्तोऽस्य सामयिकं कार्यम्। उपनतकालम् इत्यर्थः। समर्थविभक्तिनिर्देश उत्तरार्थः॥

## ऋतोरण्। (१०५/१७६९)

तदस्य प्राप्तम् [19]इत्यनुवर्तते। [20]ऋतुशब्दात् तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे अण् प्रत्ययो भवति [21]तदस्य प्राप्तम् इत्येतस्मिन् विषये। ऋतुः प्राप्तोऽस्य आर्तवं पुष्पम्[22]।

[५३३] तदस्य प्रकरणे उपवस्त्रादिभ्यः उपसङ्ख्यानम्।
[23]उपवस्ता प्राप्तोऽस्य औपवस्त्रम्। [24]प्राशिता प्राप्तोऽस्य प्राशित्रम्॥

---

1. सम्पादि ह. 2. शौर्यम् ब. ह, सौख्यम् क. 3. वेष्या स्त्री। वेष्यम् इत्यधिकम् ब. 4. प्रातिपदिकेभ्यः इत्यधिकम् क. 5. अर्थे फ. 6. अलमित्यर्थे फ. 7. शक्तः ह, प्रभवति नास्ति ग. 8. सांग्रामिकः ब, सान्नाहिकम् ड. 9. युद्धम् इत्यधिकम् ग. 10. नास्ति फ, संवेश क. 11. असर्ग नास्ति ड, उत्सर्ग क. 12. संमोहन ड, संमोह क. 13. सन्तापादिः इत्यधिकम् ड. फ. 14. अर्थे ह. फ, इत्यर्थे क. 15. शक्तः ग. 16. मुनिः इत्यधिकम् ग. 17. ठञोऽपवादः नास्ति फ. 18. धनुषः – अनभिधानात् नास्ति ब. क. ड, 19. इत्येव ह. 20. ऋतुशब्दात् प्रथमासमर्थात् प्राप्तोपाधिकादस्येति षष्ठ्यर्थे अण् प्रत्ययो भवति ब. क. ड. ह. 21. तदस्य – विषये नास्ति ड. 22. सस्यं फलम् इत्यधिकम् ब. क, सस्यम् इत्यधिकम् ह, फलम् इत्यधिकम् फ. 23. उपवस्त्रं प्राप्तमस्य औपवस्त्रम् क. 24. प्रमितं प्राप्तमस्य प्रामितं क, उदाहरणमिदं नास्ति ड.